| **Course Title:** Modern Indian Language 1 | | | |
|---|---|---|---|
| **Course code:** AEC 102 | **No. of credits: 3** | **L-T-P:** 33-12-0 | **Learning hours: 45** |
| | | | **L:** Lectures**; T:** Tutorials**; P:** Practicals |
| **Pre-requisite course code and title (if any):** None | | | |
| **Department: Natural and Applied Sciences** | | | |
| **Course coordinator:** | **Course instructor:** | | |
| **Contact details:** | | | |
| **Course type**: Ability Enhancement Course | **Course offered in:** Semester 2 | | |

पाठ्यक्रमविवरणम् -

अयं संस्कृतभाषायाः प्रारम्भिकपाठ्यक्रमो वर्तते। अयं पाठ्यक्रमस्तेभ्यश्छात्रेभ्यो निर्मितो वर्तते ये संस्कृतभाषायाः ज्ञानमवाप्तुं यतन्ते तथा च स्नातकस्तरे आधुनिकभारतीयभाषासु संस्कृतमेकभाषारूपेण चिन्वन्ति। अस्य पाठ्यक्रमस्य मुख्योद्देश्यं छात्रेभ्यः संस्कृतभाषायाः मूलसंरचनायाः ज्ञानप्रदानं वर्तते। छात्राः संस्कृते वाक्यनिर्माणनैपुण्यं प्राप्नुयुस्तादृशः प्रयासोऽत्र विधास्यते। संस्कृतव्याकरणस्य च परिचयो बहूदाहरणपद्धतिना कारयिष्यते येन छात्राः सारल्येन संस्कृतव्याकरणस्य ज्ञानं कर्तुं समर्थाः भविष्यन्ति। भवन्तोऽनेन पाठ्यक्रमेण संस्कृतव्याकरणस्य मूलविषयान् वर्णसन्धिसमासादीन् ज्ञातुं समर्थाः भविष्यन्ति। पाठ्यक्रमेऽस्मिन् संस्कृतमन्त्राणां श्लोकानां गद्यादीनाञ्च शुद्धवाचनस्याभ्यासो कारयिष्यते। संस्कृतभाषायाः व्यावहारिकज्ञानं प्रदास्यते येन छात्राः पत्रलेखने, समाचारलेखने, समाचारवाचने च समर्थाः भविष्यन्ति। संस्कृतभाषायां विद्यमानस्य नीतिसाहित्यस्य संस्कृतेः विज्ञानस्य सामाजिकविषयाणां च ज्ञानं पाठ्यक्रमेऽस्मिन् कारयिष्यते।

**पाठ्यक्रमोद्देश्यानि** –

पाठ्यक्रममिमधीत्य छात्राः -

- संस्कृतभाषायाः मूलसंरचनां ज्ञातुं समर्थाः भविष्यन्ति।
- संस्कृतव्याकरणस्य मूलविषयाणां वर्णसन्धिसमासकारकादीनां ज्ञानमवाप्य वाक्यनिर्माणे नैपुण्यं प्राप्स्यन्ति।
- संस्कृतभाषायाः शुद्धोच्चारणे सामर्थ्यवन्तो भविष्यन्ति।
- संस्कृतभाषायाः व्यावहारिकज्ञानं विज्ञाय पत्रलेखने, समाचारलेखने, समाचारवाचने च समर्थाः भविष्यन्ति।
- संस्कृतभाषायां निहितस्य विज्ञानस्य संस्कृतेः सामाजिकविषयाणां च ज्ञानमवाप्य ज्ञानवृद्धिं कर्तुं समर्थाः भविष्यन्ति।

**पाठ्यक्रम विषयवस्तु**

| **एककम्** | **विषयः** | **L** | **T** | **P** |
|---|---|---|---|---|
| 1 | **संस्कृतव्याकरणप्रवेशः** | | | |
| | अस्मिन् एकके संस्कृतव्याकरणस्य प्रवेशाय संस्कृतवर्णानां स्वरूपं, वर्णानामुच्चारणस्थानानि, वर्णानामुच्चारणप्रक्रिया, संस्कृतव्याकरणे पदस्वरूपं पदानां विभागश्च, लिङ्गवचनपुरुषकालादीनां निरूपणं कृतो विद्यते येन छात्राः व्याकरणस्य आद्यसोपानं समासाद्य संस्कृतज्ञानस्य विस्ताराय प्रयतिष्यन्ते। अस्मिन्नेवैकके छात्राः केषाञ्चन् शब्दानां धातूनां च रूपाणि स्मृत्वा तेषां स्वरूपं च परिज्ञाय वाक्यनिर्माणस्य सरण्यामग्रेसराः भविष्यन्ति।<br>i. संस्कृतवर्णोच्चारणप्रक्रिया<br>ii. पदविभागः, शब्दानां सामान्यतो लिङ्गनिर्देशः, वचनम्, पुरुषव्यवस्था, कालव्यवस्था (लकाराः)<br>iii. संस्कृते शब्दानां रूपाणि<br>iv. संस्कृते व्यावहारिकधातूनां पञ्चलकारेषु रूपाणि | 10 | 4 | |
| 2 | **सरलवाक्यनिर्माणप्रक्रिया अशुद्धिसंशोधनञ्च** | | | |
| | अस्मिन्नेकके संस्कृतव्याकरणस्य सामान्यनियमान् परिज्ञाय छात्राः वाक्यनिर्माणं कर्तुं प्रयतिष्यन्ते। संस्कृतवाक्यनिर्माणेन छात्राणां रुचिः भाषाधिगमे इतोऽपि वर्धिष्यते। संस्कृते कर्तृवाच्यस्य कर्मवाच्यस्य भाववाच्यस्य च वाक्यानां स्वरूपं ज्ञास्यन्ति प्रयोगे च समर्थाः भविष्यन्ति। संस्कृतवाक्यानां रचनायामशुद्धिं परिज्ञाय तेषां परिष्काराय प्रयतिष्यन्ते। | 10 | 4 | |

| | | | | |
|---|---|---|---|---|
| | वाक्यनिर्माणकौशलेन छात्राः पत्रलेखने समर्थाः भविष्यन्ति समाचारलेखने च तेषां परिष्कारो भविष्यति। <br>i. संस्कृतवाक्यनिर्माणप्रक्रिया, वाच्यभेदाः कर्तृकर्मभाववाच्याः <br>ii. संस्कृतवाक्यानामशुद्धिसंशोधनम् <br>iii. पत्रलेखनम् <br>iv. समाचारलेखनम् <br>v. निबन्धलेखनम् | | | |
| 3 | **संस्कृते निहितसंस्कृतिविज्ञानसामाजिकविज्ञानानां च सामान्यं ज्ञानम्** | | | |
| | अस्मिन्नेकके संस्कृतभाषायां निहितस्य संस्कृतिविषयकपाठस्य, संस्कृते निहितविज्ञानविषयकपाठस्य तथा च संस्कृते निहितसामाजिकविज्ञानविषयकपाठस्य च सामान्या चर्चा वर्तते, येन छात्रां संस्कृतभाषायां निहितज्ञानेन परिचयो भविष्यति। <br>i. संस्कृतिविषयकः पाठः <br>ii. संस्कृते प्राचीनविज्ञानविषयकः पाठः <br>iii. सामाजिकविज्ञानाधारितः पाठः | 7 | 4 | |
| 4 | **संस्कृतसाहित्यम्** | | | |
| | अस्मिन्नेकके संस्कृतसाहित्ये पद्यकाव्यस्य गद्यकाव्यस्य कथासाहित्य च परिचयो कारयिष्यते। गद्यपद्यकथानां लक्षणं ज्ञात्वा काव्यभेदान् छात्राः ज्ञास्यन्ति। <br>i. गद्यकाव्यम् <br>ii. पद्यकाव्यम् <br>iii. कथासाहित्यम् | 6 | | |
| | **Total** | 33 | 12 | 0 |

**Evaluation criteria**

- लघुपरीक्षा 1: लिखितपरीक्षा [प्रथमद्वितीययोः एककयोः समाप्तौ] -- 25%
- लघुपरीक्षा 2: लिखितपरीक्षा [तृतीयैककस्य समाप्तौ] -- 25%
- सत्रान्तपरीक्षा: लिखितपरीक्षा [सत्रस्य समाप्तौ सत्रान्तपरीक्षा सम्पूर्णपाठ्यक्रमः] -- 50%

**सन्दर्भग्रन्थसूची**


- रचनानुवादकौमुदी, कपिल द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी,
- पाणिनीय शिक्षा, दयानंद सरस्वती, वैदिक यन्त्रालय, अजमेर
- कठोपनिषद्, आचार्य सुरेन्द्र शास्त्री, चौखम्बा
- नीतिशतकम्, गोस्वामी प्रह्लाद गिरि, भारतीय विद्या प्रकाशन
- चरक संहिता, मोतीलाल बनारसी दास, दिल्ली
- संस्कृत साहित्य का इतिहास, डॉ. उमाशंकर शर्मा 'ऋषि', चौखम्बा भारती अकादमी, वाराणसी
- शुकनासोपदेश, श्री प्रह्लाद कुमार, मेहरचन्द्र लक्ष्मण दास प्रकाशन, दिल्ली
- हितोपदेशः व्या० श्री नारायण राम आचार्य 'काव्यतीर्थ', चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
- संस्कृत पत्रकारिता का इतिहास, डॉ. राम गोपाल मिश्र, विवेक प्रकाशन, दिल्ली


**छात्राणामुत्तरदायित्त्वम्** - छात्राः पाठितविषयं पाठानन्तरं संसाधयेयुः। अधिगतविषयं च अभ्यासात्संरक्षेयुः। छात्राः सर्वासु अन्तःक्रियासु सम्मिलिताः स्युः।

**Course Designed by:**

- Dr. Vijender Singh, Assistant Professor, School of Sanskrit and Indic Studies, Jawaharlal Nehru University, New Delhi-67

**Course Reviewers:**

The course is reviewed by the following reviewers:

- Dr. Gopal Meena, Professor School of Sanskrit and Indic Studies, Jawaharlal Nehru University, New Delhi-67
- Dr. Sudhir Arya, Professor School of Sanskrit and Indic Studies, Jawaharlal Nehru University, New Delhi-67